Gyanshauryam, International Scientific Refereed Research Journal
Available online at : www.gisrrj.com
OPEN ACCESS
© 2025 GISRRJ | Volume 8 | Issue 1 | ISSN : 2582-0095

# भारतीयज्ञानपरम्पराधारेण भवभूतिकृतेः मालतीमाधवनाटके शैक्षिकतत्त्वानि

**सुश्री सङ्गीता मण्डल**
शोधच्छात्रा, शिक्षाशास्त्रीविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

**सारांशः–** संस्कृतसाहित्यसागरे भवभूतिकृतिः मालतिमाधवनाटकम् स्वगुणगणैः सर्वानतिशय्य वर्तते इत्यत्र न संशयः। तत्र बहुविधाः विषयाः आलोचिताः। तेषु विषयेषु अस्मिन् प्रबन्धे पाठ्यशैली नारीविद्या च विस्तरेण प्रतिपादिता। मालतीमाधवनाटके एतौ विषयौ महत्तात्पर्यमावहति। प्राचीनकाले वेदवेदाङ्गाध्ययनमेव पाठ्यक्रमः आसीदिति प्रस्तावनायां दृश्यते। स्त्रियः अपि विद्याभ्यासं कुर्वन्ति विशेषतः बौद्धमतानुयायिन्यः आसन्निति वक्तुं शक्यते। एतौ विषयौ अत्र विस्तारेण प्रतिपाद्यते।

**कूटशब्दाः** – भवभूतिः, मालतिमाधवम्, नाटकम्, स्त्रीशिक्षा, विद्याभ्यासप्रक्रिया, निहितशैक्षिकतत्त्वम्।

---

- **उपोद्घातः** भवभूतिकृतिषु अन्यतमकृति वर्तते मालतिमाधवनाटकम्। मालतीमाधवनाटके पाठ्यक्रमः, नारीविद्या इत्येतयोः प्रस्तावः वर्तते। अपि च विद्याध्ययनार्थं सुदूरं देशं गत्वा विद्यार्थिनः विद्याभ्यासं कुर्वन्तिस्म इत्यपि ज्ञायते।
- **पाठ्यक्रमः** प्राचीनकाले एव मालतीमाधवे अपि वेदवेदाङ्गाध्ययनमेव पाठ्यक्रमः आसीदिति प्रस्तावनायां दृश्यते। भवभूतिः स्वयम् अधीति आसीत्। अध्ययनस्य फलं ज्ञानमित्यापि सूत्रधारवाक्येषु स्पष्टं भवति। वेदशाखानाम् अनन्तत्वात् अध्येतारः स्वशाखाध्ययने एव अनुरक्ताः भवन्ति स्म। अपि च ब्राह्मणाः एव अध्यापकाः आसन्। वेदाध्ययनेन चतुर्वर्ग प्राप्तेः अवकाशे स्थितेपि मोक्ष एव तेषां ध्येयमासीत्। भवभूतेः वंश वर्णने एष विषयः स्पष्टतया वर्णितः। यद्यपि ब्राह्मणेन स्वशाखाम् एव अध्येया इति स्मृतिः तथापि यथाशक्ति सर्ववेदाध्ययनं कुर्वन्तिस्म। विद्याभ्यास संस्काराद्यनुसृत्य ब्राह्मणेषु श्रोत्रियत्वं भवति इत्यपि तत्र वर्णितम्। अतः पाठ्यक्रम एव गौरवप्रमापकः इत्यपि तत्र स्पष्टम्।
- **सूत्रधारः** अस्ति दक्षिणापथे पद्मपुरं नाम नगरम्। तत्र ब्राह्मणाः केचित्तैत्तिरीयाः पङ्क्तिपावनाः काश्यपाः पञ्चाग्नयः सोमपीथिनो धृतव्रता उदुम्बरनामानो ब्रह्मवादिनः प्रतिवसन्ति।

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License

**ते श्रोत्रियास्तत्त्वविनिश्चयाय भूरिश्रुतं शाश्वतमाद्रियन्ते।**

**इष्टाय पूर्ताय च कर्मणेऽर्थान् दारानपत्याय तपोऽर्थमायुः।।**

न केवलम् अध्ययन योग्यता सम्पादने धनार्जनसाधनं स्यात्। किन्तु येनाध्ययनेन तत्वज्ञान निश्चयो भवति। तथाविधः पाठ्यक्रमः अपेक्षित इति तत्र स्पष्टं भवति। एवम् अधीयानाः एव पङ्क्तिपावनाः भवन्ति।

- **गुरुः** पूर्वोक्त भवभूतिवाक्येषु पङ्क्तिपावन शब्दोऽपि गुरुः कथं भाव्यः इत्येवमर्थं निरुपयति। सर्ववेदाध्ययनतत्परः सर्ववेदाध्यापने समर्थाः शिष्यवात्सल्य सम्पन्नः योग्यो भवति। गुरुः ज्ञान प्रधानस्यात् न धनः प्रधानः। विद्यां च ज्ञानार्थमेव उपयुञ्जीत न धनार्थमित्यपि पूर्वोक्त पङ्क्तिपावन शब्देन कविः सूचयति। मनुना पङ्क्तिपावन लक्षणम् एवं दर्शितम्।

**अग्र्याः सर्वेषु वेदेषु सर्वप्रवचनेषु च**

**श्रोत्रियाऽन्वयजाश्चैव विज्ञेयाः पङ्क्तिपावनाः।।**

**त्रिणाचिकेतः पञ्चाऽग्निस्त्रिसुपर्णः षडङ्गवित्।**

**ब्रह्मदेयात्मसन्तानो ज्येष्ठसामग एव च।।**

**वेदाऽर्थवित्प्रवक्ता च ब्रह्मचारी सहस्त्रदः।**

**शतायुश्चैव विज्ञेया ब्राह्मणाः पङ्क्तिपावनाः।।**

- **छात्रः** छात्रः भिन्नेषु विषयेषु कृतश्रमः अभवत्। किन्तु कस्यचन अधीतस्य विषयस्य द्वितीयेऽस्मिन् विषये प्रयोजनं न भवति। तथापि तयोः भिन्नत एव धारणे निर्वहणे यदि समर्थः तदैव पण्डितो भवेदिति कविः स्वविषयमेव उक्त्वा निरुपितवान्। वेदाध्ययनस्य वेदान्तज्ञानस्य योगस्य च अध्ययनं ज्ञानफलकं लौकिक विषयाः तेन न सिद्धाः भवन्ति। आमुष्मिक सम्पत्तेः अपि कदाचित् लौकिकानन्दोऽपि अनुभाव्यः तदा भिन्न विषये परिश्रमः कार्या इति कविः सूचितवान्। भवभूतिः वंशानुक्रमेण अधीति शास्त्रपारगो भूत्वापि काव्यरचनायां व्यासङ्गमपि कृतवान्। श्रोत्रियास्तावत् वैदिकक्रियासु विघ्नमुत्पादयति इति काव्यालापाश्च वर्जयेत् इति वदन्ति। यदि शिष्यः समर्थः निर्विघ्नं विरुद्धाः विद्याः अभ्यस्य तासु कुशलोपि भवतीति कविः एवं सूचितवान्।

**यद्वेदाध्ययनं तथोपनिषदां सांख्यस्य योगस्य च**

**ज्ञानं तत्कथनेन किं न हि ततः कश्चिद् गुणो नाटके।**

**यत्प्रौढित्वमुदारता च वचसां यच्चार्थतो गौरवं**

**तच्चेदस्ति ततस्तदेव गमकं पाण्डित्यवैदग्ध्ययोः।।**[1]

- **नारीशिक्षा** - स्त्रियः अपि विद्याभ्यासं कुर्वन्ति विशेषतः बौद्धमतानुयायिन्यः आसन्निति वक्तुं शक्यते। यतः वैदिकमत धर्मशास्त्रेषु स्त्रीणां त्रयीविद्याभ्यासः निषिद्धो दृश्यते।

श्रीमद्भागवते स्पष्टं उक्तं यत् –

**स्त्रीशूद्रद्विनबन्धूनां त्रयी न श्रुतिगोचरा।**

**तेषामेव हितार्थाय पुराणानि कृतानि वै।।** इति

अस्मिन् नाटके कामन्दकी बौद्धमत वृद्धपरिव्राजिका। साऽपि स्त्रियः अध्यापयति स्मेति तस्याः शिष्यायाः अवलोकितायाः स्थितेः स्पष्टं भवति। नटः इमं विषयं स्पष्टं वदति।

- **नटः** "सौगतजरत्प्रव्राजिकायाः कामन्दक्यास्तु प्रथमां भूमिकां भाव एक एवाधीते। तदन्तेवासिन्यास्त्वहमवलोकितायाः।"

तदानीन्तनकाले स्त्रीपुरुषयोः सहविद्यापि आसीत्। स्त्रियः अपि दूरदेशमागत्य पुरुषैः समेताः ताः विद्याभ्यासं कुर्वन्ति स्म। कामन्दकी नानादिगन्तागतै पुरुषविद्यार्थिभिः सह कृत विद्याभ्यासा इति तस्याः एव वाक्यैः स्पष्टं भवति।

- **कामन्दकी "यदैव नो विद्यापरिग्रहाय नानादिगन्तवाससाहचर्यमासीत्तदैवास्मत्सौदामिनी समक्षमनयोर्भूरिवसुदेवरातयोः प्रवृत्तेयं प्रतिज्ञा अवश्यमावाभ्यामपत्यसम्बन्धः कर्तव्य इति।"**

तत्र वसतोः स्त्रीपुंसयोः स्नेहाः अपि प्रवृद्धो भवति स्म। एवं स्नेहे सत्यपि पवित्रभाव एव आसीत् न भाव कालुष्यमिति कामन्दक्याः परिशुद्धवर्तनेन अवगम्यते।

पाठ्यक्रमे क्षत्रिययोग्यविद्यानाम् अध्ययनमपि सूचितम्। माधवः आन्वीक्षिकी श्रमाय देवरातेन कुण्डिलात् पद्मावतीपुरं प्रेपितः। किन्तु माधवस्य विद्याभ्यासः तद्विवाहस्य आनषङ्गिक एव न मुख्यः। श्रृङ्गारभावेन स्पृष्टः सः विद्याभ्यासात् पराङ्मुखो बभूव इति प्रथमाङ्के विस्तरेण तस्य श्रृङ्गारभाव वर्णनेनैव स्पष्टं भवति। यतः

**तदवधिकुशली पुराणशास्त्र स्मृतिशतचारुविचारजोविवेकः।**

**यदवधिनपथं दधातिचित्ते हरिणकिशोरदृशो दृशोर्विलासः।।**

- **गुरुशिष्यसम्बन्धः** गुरुः शिष्यम् अतीव वात्सल्येन पश्यति। कामन्दकी मालतीमाधवं च शिष्यरुपेण परिगृह्य तयोः वात्सल्यं दर्शितवती। दशमाङ्के मालती कामन्दक्या दर्शितं वात्सल्यं एवमभिनन्दन्ति।

**स्तन्यत्यागात्प्रभृति सुमुखी दन्तपाञ्चालिकेव**

**क्रीडायोगं तदनु विनयं प्रापिता वर्धिता च।**

**लोकश्रेष्ठे गुणवति वरे स्थापिता, त्वं मयैव**

**स्नेहो मातुमयि समधिकस्तेन युक्तस्तवापि।।** [2]

परशुरामः यथा गुरोः धनुर्भङ्गः पराभवं मत्वा प्रतीकारं कर्तुमैच्छत्। तथैव कापालिकस्य अघोरघण्टस्य शिष्या कपालकुण्डल माधवेन हते गुरौ तत्प्रतीकारं कर्तुं ययते। मालत्याः अपहरणेन शक्त्यै बलिर्भवति। मालतीवियोगेन

माधवश्च मृतो भवति। तेन गुरो: मरणस्य प्रतिक्रिया भवतीतिमत्वा नवमाङ्के मालतीम् अपहृतवती। तत: कामन्दकी सौदामिनी साहाय्येन तान् विजित्य मालतीं रक्षितवति।

श्रङ्गारप्रधानत्वात् काव्ये शिक्षाविषया: एवं विरलविरला एव दृष्टा: भवन्ति।

- **आधुनिकपरिप्रेक्ष्ये मालतीमाधवरूपके निहितशैक्षिकतत्त्वानुशीलनम्** - मालतीमाधवे आधुनिक परिप्रेक्ष्यदृष्ट्या अपि बहुनि शैक्षिकतत्त्वानि निहितानि सन्ति। तद्यथा –

**ते श्रोत्रियास्तत्त्वविनिश्चयाय भूरि श्रुतं शाश्वतमाद्रियन्ते।**

**दृष्टाय पूर्ताय च कर्मणेऽर्थान् दारानपत्याय तपोऽर्थमायु:।।**

- **निहितशैक्षिकतत्त्वम्** - वर्तमानसमये अस्य श्लोकस्य साक्षात् महत्त्वं दरीदृश्यते। नवयुवका: प्रौढा: पुरुषा: महिला: वा सर्वे धनानि कामयन्ते शास्त्रचिन्तनं गौणत्वं भजते। शास्त्रचिन्तने अपि धनार्जनस्य कामना दृश्यते। पूर्वोक्ता: श्रोत्रिया: ब्राह्मणा: इष्टपूर्ताय यज्ञ–याग–अनष्ठान–वापी–कूप–तडागादीनां निर्माणार्थ धनसंग्रहार्थम् अपेक्षा कुर्वन्ति स्म। तथा च अपत्याय दारान् आद्रियन्ते स्म न तु कामायेति तपोऽर्थ तपश्चरणार्थ न तु व्यसनार्थं। परन्तु वर्तमानसमये जना: पारमार्थिककार्य स्वप्रसिद्धये आत्मख्यात्यर्थे विधियन्ते।

**यन्मां विधेयविषये स भवन्नियुङ्क्ते**

**स्नेहस्य तत्फलमसौ प्रणयस्य सार:।**

**प्राणैस्तपोभिरथवाऽभिमतं मदीयै:**

**कृत्यं घटेत सुहृदो यदि तत्कृतं स्यात्।।**[3]

- **निहितशैक्षिकतत्त्वम्** - यद्यपि सा महाभागा कामन्दकी एका तपस्विनी अस्ति, सांसारिकविषयात् पराङ्मुखा अस्ति तथापि तासु सामाजिकज्ञानं वर्तते। तपश्चर्यां संलभ्गत्त्वात् मालतीमाधवयो: विवाहजन्यकर्म सम्पादनं न शोभते तथापि मित्रभूवसुदेवरातयो: कार्यार्थं तत्परा वर्तते। सा कथयति यत् मदीयै: प्राणै: अथवा तपोभि: सहृद: अभिमतं कृत्यं घटेत यदि तत्कृतं स्यात्। वर्तमानसमये अपि कामन्दीकीवत् कार्यं समाजे अपेक्षितम् अस्ति । निजस्वार्थं परित्यज्य जना: कार्यं करिष्यन्ति तदा समाजे सामाजिकसमरसताया: सञ्चार: भविष्यति। विद्यालयस्तरत: छात्रेषु इदं ज्ञानं दीयते तदा तेषां सामाजिकविकास: सम्यक्तया भवितुमर्हति।

**व्यतिषजति पदार्थानान्तर: कोऽपि हेतु**

**न खलु बहिरूपाधीन्प्रीतय: संश्रयन्ते।**

**विकसति हि पतङ्गस्योदये पुण्डरीकं**

**द्रवति च हिमरश्मावुद्गते चन्द्रकान्त:।।**[4]

- **निहितशैक्षिकतत्त्वम्** - अस्मिन् श्लोके स्वाभाविकस्नेहविषये वर्णनमस्ति। छात्रेषु बाल्यकादारभ्य: स्वाभाविक स्नेहस्य जागरणं भवेत्। येन समाजे स्वार्थविरक्तम् अधिकारीणां अभियन्तानां चिकित्सकानां अध्यापकानां भूयात् येन स्वस्य-समाजम्य राष्ट्रस्य च निर्माणं भवेत्।

**न खलु तादृश्यो महाभागधेयजन्मानोऽन्यत्रासक्तचेतसो भूत्वा परत्र चक्षुरागिण्यो भवन्ति**

- **निहितशैक्षिकतत्त्वम्** - अस्मिन् मकरन्दस्य वाल्ये गूढशौक्षिकतत्त्वानां विषये ज्ञानं निहितमस्ति। वर्तमाने अस्य सुतराम् आवश्यकता अस्ति। यत् ते अपि एकस्मिन् विषये स्वस्य चित्तं नियोज्य तस्मिन् विषये लक्ष्यकेन्द्रिता: कुर्वन्तु इति अनेन लक्ष्यप्राप्तये सौकर्यं भविष्यति।

**अभिहन्ति हन्त कथमेष माधवं सुकुमारकायमनवग्रहः स्मर:।**

**अचिरेण वैकृतविवर्तदारुण: कलभं कठोर इव कूटपाकल:॥**

- **निहितशैक्षिकतत्त्वम्** - कामविषयकं चिन्तनं वर्तमाने छात्रवर्गेषु अधिकं दृश्यते। अनेन कारणेन तेषाम् अवधानम् अन्यत्र दृश्यते। कामशक्ते: चिन्तमवशात् तेषां गृहात् पलायनं विषयात् उन्मुखीकरणं जीवनवृत्तिं प्रति अनवधानता दृश्यते। अत: तेषां मार्गदर्शनं समये भवेत् अनेन तेषां इदृशी समस्या अपगता भविष्यति।

**मनोरोगस्तीव्रो विषमिव विसर्पत्यविरतं**

**प्रमाथी निधूमो ज्वलति विधुत: पावक: इव**

**हिनस्ति प्रत्यङ्गं ज्वर गरीयानितो इतो**

**न मां त्रातुं तात: प्रभवति न चाम्बा न भवती॥**

- **निहितशैक्षिकतत्त्वम्** - बालकेषु बालिकासु च प्राय: युवावस्थायां कामविषयिणि समस्या भवति। अस्यामवस्थायां यून: आत्महत्या आत्मदाह इत्यादीकं कुकृत्यं असामाजिककार्यं च सम्पादयन्ति अनेन अन्य बालका: बालिका: च कुप्रेरिता: भवन्ति। अत: यूनां मातापितृभ्यां अध्यापकेभ्य: च तेषां मित्रवत् समये समये मार्गदर्शनं कृत्वा जीवनलक्ष्योन्मुखीकरणं कर्तव्यम् इति।

**गुणापेक्षाशून्यं कथमिदमुपक्रान्तमथवा**

**कुतोऽपत्यस्नेह: कुटिलनयननिष्णातमनसाम्।**

**इदं त्वैदम्पर्यं यदुत नृपतेर्नमसचिव:**

**सुतादानान्मित्रं भवतु स भवान्नन्दन इति ।**

- **निहितशैक्षिकतत्त्वम्** - अस्माभि: सर्वदा चिन्तनं कृत्वैव कार्यं कर्तव्यम् उक्तञ्च सहसा न विदधीत न क्रियामविवेकपरमापदां पदं। विणृते ही विमश्यकारिणं न गुणलुब्धा: स्वयमेव संपदां। छात्रा: अस्मिन् वयसि अचिन्तयित्वा कार्याणिं कुर्वन्ति अत: अध्यापकानां गुरुचरणानां लक्ष्यं भवेत् यत् तेषां चयनं सम्यक् भवेत्।

**प्रभवति प्राय: कुमारीणां जनयिता दैवं च।**

- **निहितशैक्षिकतत्त्वम्** - अद्यतनसमाजे ये जना: स्त्रीपुरुषयो: भेदं प्रकटयन्ति तेषां कृते भवभूतिना उक्तम् यत् बालिकानां परिणयादिकार्यं सुयोग्याय वराय भवेत्। समाजे बालिकानां स्त्रिणाञ्च स्थिति: तदैव सम्यक् भवितुम् अर्हति यदा मातापितरौ सम्यक्तया तयो: पाठनं संरक्षणं च करिष्यत:।

**मालती-कुतो वा महोदधिं वर्जयित्वा पारिजातस्योद्गम इति ।**

- **निहितशैक्षिकतत्त्वम्** - विद्वज्जनै: गुणा: एव दृश्यते अत: कस्यचिदपि मानवस्य छात्रस्य वा अन्तर्निहितगुणानां विकास: समुचित् वातावरणे एव सम्भवति। अत: यदि कस्यचित् छात्रस्य मानसिकं शैक्षणिकञ्च विकास: न भवति तदा तस्य कृते उपयुक्त-वातावरणम् अध्यापकानां समुचितमार्गदर्शनं प्रदानेन सम्भवति अत: आधुनिकपरिप्रेक्ष्ये इयं समस्या विद्यालयेषु दरीदृश्यते।

**शास्त्रे प्रतिष्ठा सहजश्च बोध: प्रागल्भ्यमभ्यस्तगुणा च वाणी।**

**कालानुरोध: प्रतिभानवत्त्वमेते गुणा: कामदुधा: क्रियासु॥**

- **निहितशैक्षिकतत्त्वम्** - यदि शास्त्रे शङ्कारहितसम्यग्ज्ञानं स्वाभाविक: बोध: प्रौढोक्तिवैचक्षण्यं प्रयत्नसम्पाद्या: गुणा: प्रसादमाधुर्यादय: यस्या: सा वाणी कालानुरोध: वचननिरीक्षणं प्रतिभानवत्त्वं तादात्मिकनवनवोन्मेषशालिप्रतिभानवत्त्वम् इत्येते गुणा: क्रियासु साधयितुमिष्टासु कामदुधा: मनोरथपूरका: भवन्ति। वर्तमानसमय: क्लिष्ट: वर्तते प्रतियोगितादृष्ट्या। एकस्यां परीक्षायां लक्षाधिकपरिक्षार्थिन: भागं गृहणन्ति परन्तु पदानि नियतानि भवन्ति अत: अस्मिन् क्षणे महत् परीक्षमस्य आवश्यकता वर्तते ये छात्रा: सम्यक्तया शास्त्रम् उत पाठ्यक्रमविषयाणाम् अध्ययनं कुर्वन्ति तथा च मननं कुर्वन्ति तेषां सफलता सम्भवति।
- **निहितशैक्षिकतत्त्वम्** - आधुनिकपरिप्रेक्ष्ये जनेषु निराशा तन्यता भग्नाशा च सामान्यतया दृश्यते। अत: आत्मघातीनां विषये दिनानुदिनं श्रूयते दृश्यते च इयं अध्ययनशीलच्छात्रेषु अपि दृश्यते अत: आवश्यकता अस्ति सम्यक् मार्गदर्शनस्य परस्परं संवादस्य च।

**वाक्प्रतिष्ठानि देहिनां व्यवहारतन्त्राणि ।**

**वाचि पुण्यापुण्यहेतवो व्यवस्था: सर्वथा जनानामायतन्ते।**

- **निहितशैक्षिकतत्त्वम्** - शब्दस्य अर्थात् वाण्या: महत्त्वं सर्वदा वर्तते। वाण्या: महत्त्वं गायन्त: आचार्येण भतृहरिणा उक्तं यत्- 'वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम्'।

अतः मधुरा वाणी सर्वैः रोच्यते आत्मानं शान्तिं प्रयच्छति तथा च अन्यानपि शीतलतां प्रददाति। आधुनिकपरिप्रेक्ष्ये विद्यालयीयच्छात्रेषु सम्यगवाण्याः प्रयोगार्थं प्रेरणाप्रदानस्य आवश्यकता प्रतीयते। लब्धप्रतिष्ठितविद्यालयानां छात्राः अपशब्दानां निम्नस्तरीयभाषायाः प्रयोगं कुर्वन्ति यस्यां अन्येषां कृते सम्मानं न भवति। अतः प्रसङ्गेऽस्मिन् तेषां वाचिकौशलस्य तथा च मर्यादिताभिव्यक्तिशैल्याः च विकसार्थम् अतीव ध्यानम् अपेक्षते।

**त्वं वत्सलेति कथमप्यवलम्बितात्मा सत्यं जनोऽयमियतो दिवसाननैषीत्।**

**आबद्धकङ्कणकरप्रणयप्रसादमासाद्य नन्दतु  चिराय फलन्तु कामाः॥**

- **निहितशैक्षिकतत्त्वम्** - सम्यकतया यदि कोऽपि जनः किमपि कामयते तथा च कार्यं विदधाति तदा नूनमेव फलं सः प्राप्नोति। मालतीरपि माधवं साकांक्षरूपेण कामयते अतः माधवः अपि तावत् कालपर्यन्तं प्राणम् अधारयिष्यत् यावत् कालपर्यन्तं तस्याः प्राप्तिः न अभविष्यत्। आधुनिकपरिप्रेक्ष्ये प्रतियोगितायाः कालत्त्वात् युवानः यथासमये सफलतां न प्राप्य हतोत्साहिताः भवन्ति परिणामत्त्वात् आत्मानं इन्ति। अतः अस्मिन्नवसरे धैर्यधारणस्य तथा च सततपरिश्रमस्य आवश्यकता वर्तते।

**प्रेयो मित्रं बन्धुता वा समग्र सर्वे कामाः शेवधिर्जीवितं वा।**

**स्त्रीणां भर्ताधर्मदाराश्च पुंसामित्यन्योन्यं वस्तयोर्ज्ञातमस्तु॥**

- **निहितशैक्षिकतत्त्वम्** - उपनिषद-पुराण-धर्मशास्त्रेषु च उक्तं यत् स्त्रियः पुरुषाश्च समानौ वर्तन्ते। यथा याज्ञवल्क्य मैत्रेयी च लोपामुद्रा अगस्त्य च वसिष्ठः अरुन्धती च इत्यादयः उदाहरणानि सन्ति यत्र स्त्रीपुरुषयोः परस्परं अभेदः दृश्यते। वर्तमानसमये अपि बालकबालिकयोः मध्ये भेदः असामानता वा दृश्यते। यावत् पर्यन्तं स्त्रीपुरुषयोः मध्ये सामाजिकासमानताः स्थगनं न भवति तदा समाजस्य राष्ट्रस्य वा उन्नतिः न सम्भवति।

**गृहे गृहे पुरुषाः कुलकन्यका उद्वहन्ति।**

न च कोऽपि लज्जाप्रसाधनमनपराधमुग्धस्वभावं कुलकुमारीजनं प्रभवामिति बागनलेन प्रज्वलयति। एते खलु ते आमरणसम्भ्रियमाणदुःखसहपरगृहनिवासवैराग्यकारिणा हृदयशल्यनिक्षेपा महापरिभवाः। येषां कृते स्त्रीजन्मलाभं जुगुप्सते बान्धवाः।

- **निहितशैक्षिकतत्त्वम्** - सामप्रतिककाले स्त्रीणां स्थितिः यथा भवेत् तथा समाजे न दृश्यते। अतः सर्वकारस्य तथा मातापितरोः इदं परमं कर्तव्यं अस्ति यत् ते बालक-बालिकयोः पोषणरक्षणशिक्षेत्यादिविषये साम्यं भजन्तु इति। यावत् कालपर्यन्तं स्त्रीणां दशा दिशा च पुरुषवत् साम्यं न भविष्यति तावत् कालपर्यन्तं समाजस्य राष्ट्रस्य वा उत्थानं न कल्पयते।

**जीवजीवितसमाय जीवितं देहि जीवतु सुहज्जनश्च ते।**

**अङ्गैस्तुहिनसङ्गशीतलैः पुत्रि! मां प्रियसखीं च जीवय॥**

- **निहितशैक्षिकतत्त्वम्** - अत्र सामाजिकसमस्यायाः विचारं प्रकटितवन्तः। कामन्दकी यथा माधवलवङ्गिकयोः मङ्गलविषये चिन्तयति तथैव अस्माभिरपि सर्वेषां कृते चिन्तनं, स्यादिति। शास्त्रमपि भणति यत् सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः इति ।

**शिवमस्तु सर्वजगतां परहितनिरता भवन्तु भूतगणाः।**

**दोषाः प्रयान्तु शान्ति सर्वत्र सुखी भवतु लोकः॥**

- **निहितशैक्षिकतत्त्वम्** - संस्कृतनाटकान्ते भरतवाक्यं मङ्गलवाक्यं वा भवत्येव। समाजहितं तस्य प्रयोजनं भवति। यदा समाजः राष्ट्रञ्च सुखसम्पन्नं भवति तदैव नागरीकानामपि सम्यगुत्थानं भवति। परन्तु वर्तमानसमये स्वार्थहितरताः मानवाः आत्मानं चिन्तयन्ति आस्मात् कारणात् समाजे दुराग्रहस्य भयस्य अन्तर्द्वन्द्वस्य च वातावरण निर्मितं वर्तते। अतः भरतवाक्यवत् आस्माकं सर्वेषां चिन्तनं स्यादिति।
- **निष्कर्षः** - भारतीयज्ञानपरम्परा आधारेण भवभूतिकृतेः मालतीमाधवनाटके विविधानि शैक्षिकतत्त्वनि वर्तन्ते। वर्तमानसमये अपि बालकबालिकयोः मध्ये भेदः असामानता वा दृश्यते। यावत् पर्यन्तं स्त्रीपुरुषयोः मध्ये सामाजिकासमानताः स्थगनं न भवति तदा समाजस्य राष्ट्रस्य वा उन्नतिः न सम्भवति। परन्तु तत्कालीनसमाजे एतादृशी व्यवस्था नैवासीत्। अतः भारतीयज्ञानपरम्परायाः महत्त्वं वर्तते।

**सन्दर्भग्रन्थसूची**


1. भवभूतिः मालतीमाधवम्, चौखम्बा संस्कृत सीरीज अफिस वाराणसी- 1
2. द्वितीयसंस्करण 1986, द्वितीयसंस्करण 1971
3. भवभूतिः मालतीमाधवम्, मोतीलाल बनारसीदास जवाहरनगर दिल्ली-7 1987 16. राय गंगासागर, महाकवि भवभूतिः, चौखम्बा विद्या भवन, वाराणसी, 1990
4. विश्वनाथः साहित्यदर्पणन् मोतीलाल बनारसीदास वराणसी 2009
5. क्षेमेन्द्रः औचित्यविचारचर्चा, चौखम्बा विद्याभवनम् वाराणसी - 1 धनञ्जयः दशरूपकम्, चौखम्बा विद्याभवनम् वाराणसी-1 चतुर्थसंस्करण।


1.मालतीमाधवनाटकम् 1/10

2.मालतीमाधवनाटकम् 1/5

3.मालतीमाधवनाटकम् 1/13

4.उत्तमचरितम् 6/12